ŚIBIKĀ-VAKRAVAMŚA-LAKṢAṆAM :

A Method to Grow Crooked Bamboos for Palanquin Beams

K. V. Sarma

Curator, Vishveshvaranand Institute, Hoshiarpur.

The *Śibikā* (palanquin) has been popular in India from early times as a mode of conveyance for the royalty and the upper strata of the society. Its use in temple festivals as a *vāhana* (carrier) to take the image of the deity in procession along the outer corridors of shrines and through the city for public worship is also popularly known, especially in South India.[1] The *Mayamata*, is, perhaps, the earliest text on Indian architecture to give a detailed description of the *Śibikā* in its three types, *viz.*, *Pīṭhī*, *Śikharī* and *Mauṇḍi*, and also enunciate the measurements for their construction.[2] Ther is a parallel description also in the *Paddhti* Īśānaśivagurudeva.[3]

The basic structure of the *Śibikā* is succinctly indicated thus in the *Viśvākarma-vāstuśāstra*, in the context of the description of *Vāhanas* to be used in temple festivals (ch. 84 : *Kalpavṛkṣādivāhanalakṣaṇakramakathanam*) :

शिबिकां मानवैर्धार्यां पेटिकाकारसंयुताम् ॥18॥
अथ पार्श्वावरणकैर्हीनां वेण्वादिदण्डकाम् ।
भूतेशो वा वृषो नानालङ्क्रियामण्डितो मतः ॥19

The commentary on this passage by Anantakṛṣṇa Bhaṭṭāraka is elucidative and might be extracted here :

अथ शिबिकालक्षणमाह—शिबिकामिति, विविधरूपं शिबिकालक्षणं तु पुरोभागे पश्चाद्भागे दृढं संयोजितमाधारदण्डं मानवभटस्कन्धैर्धार्यं प्रकल्पयेत्, तादृशाधारदण्डस्तु वेणुकृतो वा वटकृतो वा सौकर्य-दायीति समयः। एवं मानवस्कन्धबाह्याधारदण्डसहितस्य शिबिकाख्यस्य वाहनस्य निर्माणं तु पेटिकारूपं

---

1. For an account of the *Śibikā-vāhana* in Vaiṣṇavite temples, see the *Vimānārcanā-Kalpa* of Marīci, of the Vaikhānasa School (Madras, 1626), Sn, on *Śibikādi-yānotsavaḥ*, pp. 352-54
2. *Cf. Mayamata* of Mayamuni, ed. T. Ganapati Sastri, Trivandrum, 1919, Ch, 31, verses 1-29.
3. See *Īśanaśivgurudeva-Paddhati* of Īśānaśivagurudeva, ed. by T. Ganapati Sastri, pt, IV, Trivandrum, 1925, pp. 453-55 : Paṭala 40, *Nityotsāza-yāna-śanādi-paṭala)*, verses 39.64.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पार्श्वयोः प्रवेशद्वारोपेतं कार्यम् । अयमेकः प्रकारः । प्रकारान्तरेण तु पार्श्वभागावरणहीनं मध्यमस्थदेववेर-स्थापनस्यकं देवबेरस्य मुखमण्डलस्फुरणार्थमग्रभागे मुकुरस्थानोपेतं विविधतचित्रपट्टिकावृतपार्श्वपट्टिकातलं शिविकाकल्पनं प्रकल्पयेत् ।।18।।

किञ्चात्र शिबिकानिर्माणे क्वचित् पूर्वभागे भूतेशगणस्कन्धधारितपूर्वदण्डं वा नन्दिदेवधारितपूर्व-दण्डं वा गन्धर्वकिन्नरादिदेवगणस्कन्धधारितदण्डं वा कार्यमिति विकल्पः । अतोऽत्र तु शिविकानिर्माणे पुष्यशिबिका-दर्पणशिबिकेत्यादिभेदश्चोह्यः क्रियासौकर्यार्थं शिल्पिभिरिति ।।19।।[1]

The essential elements of a *Śibikā*, thus, consist of a closed box-like structure with doors or an open structure without doors, fixed on a long beam of bamboo or wood which extends on both sides of the box. The seat is placed inside the box and the whole structure is carried on the shoulders of one or more persons at each end.

Now, the palanquin with the arched beam rising majestically in a steep curve over the box and with the two extending ends too slightly inclined uqwards is artistically superior to one with just a horizontal beam. It is dfficult to prepare curved beams of wood or procure naturally curved beams of wood of sufficient length. In practice, the bamboo is used exclusively for the purpose. The required bends are often made in the bamboo by the application, at the appropriate places, of strong hear when the bamboo is yet green and has not become dry and stiff. Naturally, the bamboo gets charred and injured, to some extent, in the process. An ingenious method has been developed to solve the problem, *viz.*, to grow bamboos with the necessary curves, of appropriate measures, at the required places, The short text, *Śibikā-vakravaṁśa-lakṣaṇam*, edited here enunciates a method to grow crooked bamboos. The method primarily consists of driving in appropriately curved iron structures on the sides of the bamboo plantling and making the bamboo through the said structure. Directions are given towards controlling its growth, so that, ultimately, a bamboo with bends and curves at the right places and in the right measures is produced.

The work is preserved in a single manuscript, being No. 1133 belonging to the collection of Sanskrit manuscripts of the Palace Library, Trivandrum, now deposited in the Kerala University Oriental Research Institute and Manuscripts Library, Trivandrum.[2] It is in palmleaf, in four folios, written in Malayalam script, The manuscript is well preserved and the writing is generally free from errors,

---

1. See *Visvakarma-Vāstuśāstram*, Ed. by Vasudeva Sastri and N. S. Gadre, Tanjore, 1958 (*Tanjore Sarasvti Mahal Series*, No. 85?3, p. 197,
2. For full details see the *Descriptive Catalogue of Sanskrit Manuscripts of* H. H. *the Mvharaja's Paļace, Library*, Trivandum, 1938, Vol. IV. pp· 1547-58. I am thankful to the authorities of the Library for supplying me, with a copy of this manuscript.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिबिकावक्रवंशलक्षणम्

[1]अभिवाद्य गणाधीशमभीष्टफलदायिनम् ।
शिबिकावक्रवंशस्य प्रमाणं किञ्चिदुच्यते ॥१॥
वेणोः शुभाङ्कुरं दृष्ट्वा यत्नेन परिपालयेत् ।
वराहशललीकीटभृङ्गदंशाद्युपद्रवात् ॥२॥
दृढया परिवृत्या च वचाचूर्णादिभिः पुनः ।
हस्तोन्नतात् पूर्वमस्य सुमुहूर्ते विनायकम् ॥३॥
सम्पूज्य जलगन्धाद्यैः सूपलाजादिभिस्तथा ।
वंशस्य पार्श्वयोः खात्वा यन्त्रस्तम्भौ विनिक्षिपेत् ॥४॥
यत्र रन्ध्रपथा गत्वा वक्रवेणुर्भविष्यति ।
यन्त्रमानमिति प्रोक्तं दशहस्तसमायतम् ॥५॥
मुनिसङ्ख्याङ्गुलं वीथ्या तदर्धं घनमेव च ।
एवं स्तम्भद्वये सूत्रं सिद्धे पञ्चदशं तु वा ॥६॥
त्रयोदशं वा ह्रस्वाख्यपट्टिकास्तम्भवीथिवत् ।
एकाङ्गुलं द्वयङ्गुलं वा घनं तासामुदीरितम् ॥७॥
सार्धैकहस्तं वा दीर्घं सपादं वात्र कल्पयेत् ।
स्तम्भयोर्मूलतस्त्यक्त्वा विंशत्यङ्गुलमात्रकम् ॥८॥
एकैकहस्तामायातां चतुरः पट्टिकां क्रियात् ।
पदाधिकद्विहस्तेन तस्मात् तु कुटिलायतम् ॥९॥
कुटिले पट्टिकाः सप्त पञ्चकं वा समांशके ।
स्तम्भयोः कल्पयेदस्मान्मूलवच्चतुरोऽग्रके ॥१०॥
तदाधिरोहिणी वेदं यन्त्रमन्त्रौ भविष्यति ।
मूलाग्रपट्टिकाष्टानां रन्ध्राणां विधिरुच्यते ॥११॥
स्तम्भयोः पट्टिकायोगात् प्रथमे त्र्यङ्गुलं त्यजेत् ।
द्वितीये च तृतीये च द्वयङ्गुलं तु चतुर्थके ॥१२॥
त्र्यङ्गुलं कुटिलाग्रात्तु चतुर्थं पूर्ववत्तथा ।
त्यक्ताङ्गुलान्तरे रेखां कारयेदतिसूक्ष्मतः ॥१३॥
रेखामाश्रित्य पृष्ठे तु रन्ध्रान् वंशगतोपमान् ।
त्रियवाधिकमानेन सुवृत्तान् वक्रगम्यकैः ॥१४॥

---

१. The Ms. comnences with invocatory Statement : [हरिः] श्रीगणपतये नमः । अविघ्नमस्तु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुटिलान्तःस्थिते खर्वपट्टिकासप्तके क्रमात् ।
घने द्व्यङ्गुलमाने च रन्ध्रान् कर्तुमिहोच्यते ॥१५॥
अंशाङ्कात् पट्टिकानां च कुर्यात् पूर्वापरं घनम् ।
तासामधश्चोपरि च वक्रगम्यायतं द्विधा ॥१६॥
ऊनाधिकत्रिपादार्धाङ्गुलैः कुटिलक्रमम् ।
स्तम्भादेकादिह प्रोक्तं पट्टिकाद्याद् यथाक्रमम् ॥१७॥
सपादनवकं चैव पादाधिकदिवाकरः ।
अर्धोनषोडशं चैव षोडशं च ततः परम् ॥१८॥
अष्टादश त्रिपादोनसार्धषोडशषोडशौ ।
अर्धाधिकमनुस्तेन सपादं तु त्रयोदश ॥१९॥
सपादनिधिशैलौ च सत्रिपादार्णवानलौ ।
पक्षान्तरमिहैवोक्तं चतुर्थशरयोः क्रमात् ॥२०॥
कलापञ्चदशा सार्धौ तत् सपादत्रयोदशम् ।
सपादमिहिरेणापि कुर्यान्मानं द्वयोरिति ॥२१॥
पट्टिकापञ्चके पक्षे रुद्रादित्यौ तु षोडशौ ।
तथैव च पुनः कुर्यात् तत्त्रयोदशभास्करौ ॥२२॥
रसबाणौ तृतीयात् तु पक्षान्तरमथोच्यते ।
मनुत्रयोदशौ सूर्यदिशौ रसशराविति ॥२३॥
विना पक्षान्तरेणैकं वक्रक्रममथोच्यते ।
दशार्कषोडशाः सप्तदशं चाष्टादशद्वयम् ॥२४॥
अर्धोनाष्टादशं चैव षोडशं च तिथिर्मनुः ।
एकादशं दशं सप्त रसमेतैश्च सप्तके ॥२५॥
पूर्वक्रमेण तद्वक्रं नृणां नेत्रप्रियावहम् ।
उक्तसङ्ख्याङ्गुलैरेवं कृत्वा रेखां ततः परम् ॥२६॥
वक्रगम्यैः सुरन्ध्राणि वेणोः पुष्टचैव पूर्ववत् ।
रन्ध्रैश्च वंशयात्येवं वक्रक्षेमकराय च ॥२७॥
नित्यं वंशादिकं दृष्ट्वा रज्जुकीलादिभिः सुधीः ।
कुर्यात् तत्रोचितं कर्म तथाप्यधिकसूक्ष्मतः ॥२८॥
पिपीलिकादंशकीटभृङ्गेभ्यः परिपालयेत् ।
सार्धे मास्यनलाङ्कोर्ध्वान् कण्टकान् दिनपञ्चकैः ॥२९॥
शराङ्गुलोर्ध्वमेकैकं स बहिश्चर्मकं त्यजेत् ।
त्रिमासानिड (?सेन व) चाचूर्णतैलं मासेन लेपयेत् ॥३०॥
अब्दान्ते लूनयेदग्रं रुद्रहस्तात् परं ततः ।
दिनवत्सरमासानां चतुर्थं वा तृतीयकम् ॥३१॥
नीत्वाथ सुमुहूर्ते तु दीपविघ्नेश्वरादिभिः ।
वेणोश्च लूनयेन्मूलं ततो तिथिदिनात् परम् ॥३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्त्रं चोत्पाट्य तेनैव सह भूमौ विनिक्षिपेत् ।
पट्टिकाभ्यस्ततः स्तम्भौ विमुच्यास्य तु कण्टकान् ॥३३॥
आमूलमेव विच्छिद्य वंशान्मुच्येत पट्टिकाः ।
परितः कण्टकस्थानं सुशिल्पं कारयेन्मृदु ॥३४॥
किञ्चित्तु तिलजं लिप्त्वा ततः सप्तदिनात् परम् ।
सत्रिपादद्विहस्तं वा सपादं मूलमप्यतः ॥३५॥
सवितस्त्यायतेनैव मूलाग्रे कारयेत्ततः ।
अयुगाङ्गुलयुक्तैर्वा हीनैरिष्टायतं द्वयोः ॥३६॥
स्वर्णेन रजतेनापि सूकरस्य गजस्य च ।
शीर्षमूलाग्रयोः कृत्वा हेमरूप्यारकूटकैः ॥३७॥
बद्ध्वा त्रिबाणमुनिभिरङ्गुलैरायतैर्द्वयोः ।
कल्पयेत् शिबिकायोग्यवक्रवेणुं महामतिः ॥३८॥
उक्तं वक्रोन्नतं त्वस्य शुभं पञ्चदशाङ्गुलैः ।
वक्रस्यान्तःस्थितानां तु पट्टिकानां तृतीयकात् ॥३९॥
पट्टिकापञ्चके पक्षे द्वितीयादेव च क्रमात् ।
त्रयोदशं च रुद्रश्च निधिश्च शुभदोन्नतम् ॥४०॥
आभ्यां तु कुटिलो[र्ध्वा]भ्यां निपुणैर्दृष्टलक्षणैः ।
केचिद् वक्रोच्चमित्याहुस्तथा वंशश्च दृश्यते ॥४१॥
स्तम्भयोरन्तरे द्वे वा त्रयं वाङ्कुरमस्ति चेत् ।
पूर्वरन्ध्रापरान्नेत्राङ्गुलं वार्धोनमेव वा ॥४२॥
त्यक्त्वातो वंशपुष्टयात्र कुर्याद् रन्ध्राणि पूर्ववत् ।
पुनरप्येवमेवैकां सुषिरालिं च कल्पयेत् ।
तयैव गत्वा स्वाविद्धाः सम्भविष्यन्ति वेणवः ॥४३॥
वक्राश्चायतमूलाग्रैक्याङ्गुलैष्टादिभिर्हृताः ।
ध्वजाद्ययुगे योन्याद्यां द्विजादिक्रमतः शुभाः ॥४४॥

वंशवक्रप्रकरणम्

●

Jain Education International For Private & Personal Use Only www.jainelibrary.org